# प्रश्न बैंक - 2022-23

कक्षा - उत्तर मध्यमा प्रथम वर्ष (11वीं)

विषय :- संस्कृत व्याकरणम्

कोड - 1181

① "ज्ञानात्मक वस्तुनिष्ठ प्रश्न" (सत्यं विकल्पं लिखन्तु)

I - लघु सिद्धान्त कौमुद्या: मंगलाचरणे कस्या: स्तुतिरस्ति ।

1- शङ्करस्य 2- सरस्वत्या: 3- गणेशस्य 4- ब्रह्मण: ।

ii - शिवस्य कति सूत्राणि सन्ति !

1- चतुर्दश 2- षोडश 3- पञ्चदश 4- चत्वारिंशत् ।

iii - प्रत्याहारेषु केषां वर्णानाम् ग्रहणं न भवति ।

1- अचाम् 2- हलाम् 3- इताम् 4- इक् प्रत्याहारस्य ।

IV - व्याकरणशब्दे क: धातुरस्ति ।

1- डुकृञ् करणे 2- डुक्री द्रव्यविनिमये 3- किर् , 4- कृती

V - सूत्राष्टाध्याय्या: रचयिता क: अस्ति ।

1- पतञ्जलि: 2- वररुचि; 3- भट्टोजीदीक्षित: 4- भगवान् पाणिनि:

VI - माहेश्वर सूत्राणाम् किं प्रयोजनमस्ति ।

1- अणादि संज्ञार्थानि 2- इत्संज्ञार्थानि 3- आदेशार्थानि 4- आगमार्थानि

VII - बाह्य प्रयत्न: कतिधा वर्तते ।

1- एकादशधा 2. द्वादशधा 3- पञ्चधा 4. द्विधा

VIII - प्रत्ययस्य का परिभाषा वर्तते ।

1- प्रतीयते = विधीयते इति प्रत्यय:

2- आदेश एव प्रत्यय: भवति

3. स्थानी एव प्रत्यय: भवति

4- उपदेश एव प्रत्यय: ।

IX - अकारस्य कति भेदाः सन्ति ।

1- अष्टादश 2- द्वादश 3. त्रिंशत् 4. चत्वारिंशत्

X - ह्रस्व वर्णे कति मात्राः भवन्ति ।

1- त्रिमात्रिकः 2. द्विमात्रिक 3- एकमात्रिक 4. अर्धमात्रिकः

(2) - योग्येन सह आकलयन्तु (सही जोड़ी मिलाये)

| (1) | | (2) |
|---|---|---|
| 1- वैयाकरण सिद्धान्त कौमुदी | — | लिट् लकारः स्यात् |
| 2. उदात्त संज्ञा | — | ससजुषो रुः |
| 3. वृद्धिरादैच् | — | निपात संज्ञा स्यात् |
| 4. वररुचिः | — | प्रकृति भावोभवति |
| 5. हलन्त्यम् | — | अदेङ् गुण |
| 6. ऌकारः | — | गुण सन्धि रस्ति । |
| 7. सत्नो | — | अकः सवर्णे दीर्घः |
| 8. वकारस्य | — | कण्ठ तालु : |
| 9. लृवर्णस्य | — | सवर्ण संज्ञा भवति |
| 10. अचोऽन्त्यादि टि | — — | पतञ्जलिः |
| 11. भाष्यकारः | — — | टि संज्ञा स्यात् |
| 12. तुल्यास्य प्रयत्नं सवर्णम् | — | द्वादश भेदाः सन्ति |
| 13. ओदौतौ : | — | दन्त्योष्ठम् |
| 14. दैत्यारि : | — — | द्विधा |
| 15. महर्षिः | — | त्रिंशत् |
| 16. गुण संज्ञा | — | इत्संज्ञा |
| 17. सर्वत्र विभाषागोः | — | वार्तिककारः |
| 18. चादयोः सत्वे | — | वृद्धि संज्ञा |
| 19. रुत्व विधायकम् सूत्रम् | — | उच्चैरुदात्तः |
| 20- परोक्षे लिट् - | — | भट्टोजी दीक्षितः |

3- सत्यकथनानां समक्षे आम् एवं असत्य कथनानां समक्षे "न" इति लिखत।

1- अत् धातुः सातत्यगमने अर्थे प्रयुज्यते।
2. गद् धातुः व्यक्तायां वाचि अभिमन्त्रर्थे अस्ति।
3. लकाराः दश भवन्ति
4. लिट् लकारस्य प्रयोगः भविष्यकाले भवति
5. लेट् लकारः लोके प्रयुज्यते
6. प्लुत वर्णो तिस्रः मात्राः भवन्ति
7. भविष्यत्यनद्यतने अर्थे लुट् लकारस्य प्रयोगः स्यात् ।
8. धातोः स्यतासी एतौ प्रत्ययौ लृट् लुटोः परतः स्याताम् ।
9. लोट् लकारस्य प्रयोगः भूतकालार्थे भवति ।
11. स्वरादि निपातमव्ययम् इत्यनेन निपात संज्ञा भवति।
12. गन्धनम् = सूचनम् स्यात् ।
13- धातोः तिङः प्रत्ययाः भवन्ति ।
14. दादेर्धातोर्घः इत्यनेन गत्वं भवति ।
15. हो ढः इत्यनेन हकारस्य स्थाने ढकारः स्यात् ।
16. आदिरन्त्येन सहेता इत्यनेन टि संज्ञा भवति ।
17. "षः प्रत्ययस्य" इत्यनेन षकारस्य इत् संज्ञा स्यात् ।
18. "यन्नव्येति तदव्ययम्" इति अव्ययस्य लक्षणम् ।
19- भू धातुः सकर्मकधातुरस्ति ।
20. मिप्, वस्, मस् एते प्रत्ययाः उत्तमपुरुषे क्रमाद्भवन्ति॥

P.T.O

(4) ( कोष्ठात् उचितपदं चित्वा रिक्तस्थानं पूरयन्तु )

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| अहम् | संहिता | प्रत्यय: | अदिप्रभृतिभ्य: | आय: | तदव्ययम् | चतुर्विधं | पतञ्जलि: |
| न ग्रहणम् | परिभाषा | औदौतो: | घोषाश्च | त्रिपाद्यसिद्धा: | विरामो | सप्तमी | |

1- अनियमे नियमकारिणी ..........

2 ...... प्रतिदिनं पठामि ..

3. प्रत्याहारेष्विति ........

4. भाष्यकारो मुनि: ........

5. ...... बाहुलकं वदन्ति ।

6. वचनेषु च सर्वेषु यन्न व्येति ..........

7. ................ शप:

8. गुपूधूपविच्छिपणिपनिभ्य ........

9. प्रतीयते विधीयत इति .......

10. पर: सन्निकर्ष: ......

11. ...... कण्ठोष्ठम् ।

12 हश: संवारा नादा .........

13. सणाद सप्ताध्यायीं प्रति ........

14. ङि ओस् सुप् इति .......

15. ........ अवसानम् ।

(5)- सूत्राणि पूरयन्तु ।

1- इन्द्रवरुण भव ........

2. नम: स्वस्ति स्वाहा .......

3. तिप्तस् झि .......

4- ल: कर्मणि

5. ~~लट्~~ परस्मैपदानां ......

6. गातिस्था ........

7. अनुदात्तोपदेश .......

# अतिलघूत्तरीयप्रश्नाः

1- लोप संज्ञा विधायकं सूत्रं लिखत ।
2- अनुनासिक संज्ञा केषां वर्णानां भवति
3- अद् धातोः लट् लकारे उत्तमपुरुषस्य कानि रूपाणि
4- व्याकरणस्य प्रयोजनं किमस्ति ।
5. व्याकरणस्य अधिकारी कः अस्ति
6- ऋॣवर्णयोः सवर्ण संज्ञा केन सूत्रेण भवति ।
7. ऌवर्णस्य कति भेदाः सन्ति ।
8- यलः कतिधा के च ते ।
9. अन्तस्थ संज्ञकाः के वर्णाः सन्ति ।
10. झश् प्रत्याहारे परे सति झलां कः आदेशः भवति
11- श्चुत्व विधायकं सूत्रं किमस्ति ।
12. के सन्ति सुप् प्रत्ययाः लिखन्तु ।
13. किम् आम्रेडितं प्रतिपादयन्तु ।
14. सम्प्रसारणम् किमस्ति लिखन्तु ।
15. 'त्रिचतुरोः स्त्रियां" अनेन सूत्रेण किं भवति ॥
16. लुट् लकारस्य प्रयोगः कस्मिन् अर्थे भवति ।
17. ङित् धातोः प्रयोगः कस्मिन् पदे भवति ।
18. अत्र धातोः संप्रयोगः कस्मिन्नर्थे जायते ।
19- धातोः 'लुट्' लकारे परे सति कस्य प्रत्ययस्यागमः भवति ।
20- लिङ् लकारः केषु अर्थेषु भवति ।
21- "जागृ" धातोः कः अर्थः अस्ति ।
22- तिङ् विभक्तयः काः सन्ति लिखन्तु
23- अर्च धातोः प्रयोगः कस्मिन् अर्थे भवति ।
24. दीर्घाकारे कति मात्राः सन्ति
25- व्यञ्जन वर्णे अर्धमात्रा भवति न वा लिखत ।

(6) लघूत्तरीय प्रश्नाः

26. चुरादिगणे णिच् विकरणः कस्मिन्नर्थे भवति

27 - "क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः," ... कस्य परिभाषा वर्तते ॥

28 - इच्छार्थे कः प्रत्ययो भवति ।

29. शीङ् धातोः कः अर्थः अस्ति ।

30 - "जनी प्रादुर्भावे" धातोः लट् लकारे कः आदेशः भवति ।

31 - क्रियासमभिहारे धातोः कः प्रत्ययो जायते ।

32 - हन् धातोः वधादेशः केन सूत्रेण भवति ।

33 - "श्लु" प्रत्ययः कस्मिन् गणे भवति ।

34 - "अस्" धातोः भू आदेशः केन सूत्रेण भवति ।

35 - इङ् इकावधि- उपसर्गतो न व्यभिचरतः अस्य कः अर्थः ।

36 - "श्लौ" इत्यनेन सूत्रेण किं भवति ।

37 - लज्जायामर्थे कः धातुरस्ति ।

38. "अभ्यासः कः अस्ति" सूत्रं लिखन्तु ।

39 - "जहाति" अस्य कोऽर्थः लिखत ।

40 - "दिव्" धातोः प्रयोगः केषु-केषु-अर्थेषु भवति लिखन्तु ।

41 - "च्लेः चिणादेशः" केन सूत्रेण भवति" लिखन्तु ।

42 - "मुच्यते" अस्मिन् प्रयोगे कः धातुरस्ति ।

43 - स्वादिगणस्य कः विकरणोऽस्ति । लिखत ।

44 - "तुदादिभ्यः शः" अनेन सूत्रेण किं भवति ॥

45 - "णुद् प्रेरणे धातोः लट् लकारे प्रथमपुरुषस्य कानि रूपाणि सन्ति ।

46 - "ऋत इद्धातोः" इत्यनेन सूत्रेण किं भवति ।

47 - "क्रीणाति" प्रयोगे कः विकरणः अस्ति ।

48. मुष् धातोः कोऽर्थः अस्ति लिखन्तु ।

49 - "कथ् धातो" लट् लकारे प्रथमपुरुषैकवचने किं रूपम् ।

50 - कति सन्ति तिङ् प्रत्ययाः लिखन्तु ॥

"लघूत्तरीय-प्रश्ना :"

51- ब्रूञ् धातो : "आह" आदेश : केन सूत्रेण भवति ।
52- ~~चिलि~~ च्ले : "चङ्" आदेश : कस्मिन् लकारे भवति ।
53- "हु धातो :" प्रयोग : कस्मिन् लकारे भवति ।
54- घु संज्ञा विधायकं सूत्रं किमस्ति ।
55- स्था धातो : तिष्ठ आदेश : केषु लकारेषु जायते ।
56- "पिबति" प्रयोगेऽस्मिन् क : धातुरस्ति ।
57- "सार्वधातुक संज्ञा" विधायकं किं सूत्रम् ।
58- सुनुत: कस्य लकारस्य प्रयोगोऽस्ति ।
59- श्नु विकरणे अनुबन्ध : क: ।
60 "णुद प्रेरणे" धातोरित्यस्य लट् लकारे प्रथमपुरुषस्यैकवचने किं रूपम्
61- उन्द शब्दस्य क: अर्थ: स्फोटयत ।
62- शदॢ धातौ ऌकारस्य इत्संज्ञा केन सूत्रेण भवति ।
63- "भुनक्ति" अस्मिन् रूपे क: धातुरस्ति ।
64- "ततान" अस्मिन् प्रयोगे क: लकारो वर्तते ।
65- "उ" विकरण: कस्मिन् गणे भवति ।
66- "श्ना" विकरणे कोऽनुबन्ध: अस्ति ।
67- "क्रीणाति" अस्य पदस्य कोऽर्थ: लिखन्तु ।
68- "अचुचुरत्" कस्य लकारस्येदं रूपमस्ति ।
69- इच्छायाम् सन् प्रत्यय : केन सूत्रेण भवति ।
70- सन् परे सति द्वित्वं केन सूत्रेण भवति ।
71- "चिकीर्षति" अस्य पदस्य अर्थं लिखन्तु
72- क्रियासमभिहारे धातो: क: प्रत्ययो भवति ।
73- अभ्यास संज्ञा केन सूत्रेण भवति ।

74- "तयोरेव कृत्यक्तखलर्थाः" अस्य सूत्रस्य को भाव: अस्ति।

75. प्रयोजक व्यापारे प्रेषणादौ वाच्ये धातो: क: प्रत्ययो भवति।

76. भवन्तं प्रेरयति = इति विग्रहे किम् रूपं जायते।

77. "यङ्" कस्मिन्नर्थे भवति।

78. "यङ्" प्रत्यये परे सति अभ्यासस्य गुण: केन सूत्रेण जायते।

79. "नरीनृत्यते" अस्मिन् प्रयोगे धातु: क:।

80- अच् परे "यङ्" ~~यस्य~~ प्रत्ययस्य लोप: केन सूत्रेण भवति।

81- सुबन्तात् इच्छायामर्थे क: प्रत्यय: भवति।

82- "पुत्रमात्मन: इच्छति" = इति विग्रहे किं रूपम् जायते।

83- कण्ड्वादि गण पठितेभ्य: धातुभ्य: स्वार्थे क: प्रत्यय: स्यात्।

84- क्रिया विनिमये द्योत्ये धातो: आत्मनेपदम् भवति न वा।

85- विजयते अस्मिन् प्रयोगे आत्मनेपदम् केन सूत्रेण भवति।

86- "परदारान्प्रकुरुते" अस्मिन् वाक्ये आत्मनेपदम् केन सूत्रेण भवति।

87- "हरिमुपकुरुते" अस्य कोऽर्थ: अस्ति।

88- "ओदनं भुङ्क्ते" अस्मिन् प्रयोगे आत्मनेपदं केन सूत्रेण भवति।

89- "अनुपराभ्याम् कृञ:" इत्यनेन सूत्रेण किं भवति।

90- "विरमति" प्रयोगेऽस्मिन् क: धातुरस्ति।

91- "यक्" प्रत्यय: कस्मिन् अर्थे भवति।

92- चिण्वद्भाव: केन सूत्रेण भवति।

93- "टित् आत्मनेपदानां टेरे" अस्य सूत्रस्य को भाव:।

94- आदन्त-धातो युकागम: केन सूत्रेण भवति।

95- "कर्ता: कर्मवद् भवति (कदा भवति) सूत्रं लिखन्तु।

96- अभिज्ञावचने क: लकार: संजायते।

97- "वर्तमान समीपे वर्तमानवद्वा" अस्य सूत्रस्य क: भाव:।

98- हेतुहेतुमद् भावे भविष्यकालार्थे क: लकार: भवति।

99- कृतिविधानम् बाहुलकम् (परिभाषा लिखन्तु)।

100- शास् धातो: क्यप् प्रत्यये कृते सति किम् रूपम्।

"दीर्घोत्तरीया: प्रश्ना:"

1- धातु संज्ञा विधायकं सूत्रं विलिख्य अर्थं लिखन्तु।

2- ~~कृत्य~~ कति कृत्य: सन्ति लिखत ।

3- अपादाने का विभक्तिर्भवति विलिख्य" अपादानस्य अर्थं लिखत ।

4- निम्नाङ्कितानाम् अर्थं लिखन्तु

i- गन्धनम् -

ii- उत्कुरुते -

iii- परमुपकुरुते -

iv- परदारान् प्रकुरुते -

v- निविशते ....

vi- व्यातिलुनीते ...

vii- इदामति ....

viii- अत सातत्य गमने -

ix- क्रमु पाद विक्षेपे -

x- अनद्यतने -

5- निम्नलिखितेषु प्रयोगेषु चत्वार: साधनीया: ।

1- भवति, 2- अदन्ति, 3- जुहोति, 4- क्रीणाति, 5- ब्रवीति, 6- जहौ

6- निम्नाङ्कितानां प्रयोगाणाम् विकरणानि लिखन्तु ।

= अत्ति, वेत्ति, नृत्यति, दीव्यति, सुनोति, धुनोति, तुदति, रुणद्धि कृणत्ति, करोति, प्रीणाति, अश्नाति, गणयति ॥ वृणाति, गृह्णाति॥

7- सत्यापपाशरूप ........ - सूत्रमिदं सम्पूर्ण अर्थं लिखन्तु ।

8. "पृ पालनपूरणयो:" धातो: लट् लकारस्य रूपाणि लिखत ।

9. "ह्री लज्जायाम्" अस्य धातो: लिट् लकारे प्रथमपुरुषस्य कति रूपाणि भवन्ति - लिखन्तु ।

10 - कस्मिन् गणे शप् विकरणस्य "श्लु:" भवति इति विलिख्य "श्लु:" इत्यस्य कोऽभाव: इत्यपि लेखनीयम् ।

11 - "शर्पूर्वा: खय:" सूत्रमिदं व्याख्यायताम् ।

(10) दीर्घोत्तरीयप्रश्नाः

12 - प्रत्याहारस्य परिभाषां लिखित्वा सूत्रस्य भेदान् लिखन्तु ।

13 - व्याख्यानलक्षणं विलिख्य तस्य भेदान् स्पष्टीकुर्वन्तु ।

14 - यदा कर्तरि प्रथमा स्यात् कर्मणि द्वितीया तदा ।
यदा कर्तरि तृतीया स्यात् - कर्मणि प्रथमा तदा ।
अस्य भावं लिखन्तु ।

15 - निपात संज्ञा विधायकं सूत्रं विलिख्य सर्वादि गणे ~~पठितानि~~ पठितान् शब्दान् प्रतिपादयन्तु ।

16 - राम. शब्दस्य हरि शब्दस्य च सर्वासु विभक्तिषु रूपाणि लिखत ।

17 - हु धातोः लट् लकारस्य रूपाणि लिखन्तु ।

18 - i लः कर्मणि च भावे चाऽकर्मकेभ्यः "
ii - सार्वधातुकार्धधातुकयोः
iii - लिङ्यन्यतरस्याम्
iv - शीङः सार्वधातुके गुणः
v - दाधाघ्वदाप्
vi - ज्ञाजनोर्जा
एषां सूत्राणाम् अर्थं लिखन्तु

19 - अनुवादः करणीयः (संस्कृतभाषायाम्)
1 - वह विद्यालय जाता है। 2 - मोहन उद्यान मे खेलता है।
3. राम वन जाता है। 4 - गीता गाना गाती है
5 वृक्ष से पत्ते गिरते हैं। 6 - संस्कृत भाषा सर्वश्रेष्ठ भाषा है
7 - गुरु को नमस्कार है। 8 - विद्यालय के चारो ओर वृक्ष हैं।
9 - हमे दीनों की सेवा करना चाहिये। 10 जल ही जीवन है।

20 - "पाणिनेः जीवनवृत्तम्" विषयेऽस्मिन् संक्षेपेण निबन्धः लेख्यः ।

अथवा

वार्तिककारस्य विषये निबन्धं लिखत ।

- प्राचार्य -
डॉ० लक्ष्मीकान्त मिश्र